# Revavirachitam Shiva Dhyanam

# રેવાવિરચિતં શિવધ્યાનમ્

## Document Information

Text title : Revavirachitam Shiva Dhyanam

File name : revAvirachitaMshivadhyAnam.itx

Category : shiva, shivarahasya, dhyAnam

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 14 | 10.2-23.1 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# રેવાવિરચિતં શિવધ્યાનમ્

પશ્યન્તી મણ્ડલં ભાનોઃ ધ્યાયન્તી સામ્બમીશ્વરમ્ ॥ ૧૦.૨॥

સૂર્યમણ્ડલમધ્યસ્થં સ્વર્ણકુણ્ડલમણ્ડિતમ્ ।
સ્વર્ણાઙ્ગદપ્રભાકીર્ણં સ્વર્ણકેયૂરભાસુરમ્ ॥ ૧૧॥

દિવ્યરત્નાઙ્ગુલીયાનાં શોભયા ચ વિરાજિતમ્ ।
કિરીટતારહારાણાં રાશિભિશ્ચ વિરાજિતમ્ ॥ ૧૨॥

સુવર્ણરચિતાનન્તમણિમેખલયા વૃતમ્ ।
સ્ફુરન્નૂપુરશિઞ્જીરશિઞ્જિતૈશ્ચ વિરાજિતમ્ ॥ ૧૩॥

દિવ્યાભરણસમ્પૂર્ણવામાઙ્ગગિરિજાયુતમ્ ।
સ્તૂયમાનં વેદસઙ્ઘૈર્નીલગ્રીવં મહેશ્વરમ્ ॥ ૧૪॥

સેવ્યમાનં સુરગણૈઃ પ્રમથાદ્યૈશ્ચ સેવિતમ્ ।
ભાલલોચનમારાધ્યં ત્રિશૂલાભયપાણિનમ્ ॥ ૧૫॥

કટાક્ષૈરમૃતાકારૈઃ પ્રપશ્યન્તં મુહુર્મુહુઃ ।
સ્વભક્તાન્ નન્દિકેશાદીન્ મન્દારાસારસેવિતમ્ ॥ ૧૬॥

ગૌરીમનોહરં ધીરં જરામરણવર્જિતમ્ ।
અપ્રમેયમનાદ્યન્તં વ્યુપ્તકેશં કપર્દિનમ્ ॥ ૧૭॥

કલ્યાણરૂપમાનન્દં આનન્દઘનમદ્વયમ્ ।
મહાવિદ્યાપ્રદાતારં દાતારં સમ્પદામપિ ॥ ૧૮॥

સ્મેરધારાધરાધારં નિત્યં ગૌરીમનોહરમ્ ।
અપારકરુણાપૂરપરિપૂર્ણં ચ સુન્દરમ્ ॥ ૧૯॥

ઉત્પત્તિસ્થિતિસંહારહેતુભૂતં સનાતનમ્ ।
તડિન્મણ્ડલસઙ્કાશદિવ્યવસ્ત્રવિરાજિતમ્ ॥ ૨૦॥

હિરણ્યબાહુમીશાનમપરાજિતમદ્વયમ્ ।

પ્રતિક્ષણેઽપ્યભિનવં મહોદારં સુરસ્તુતમ્ ॥ ૨૧॥

અનન્તાપ્રતિમામેયકલ્યાણગુણસાગરમ્ ।
વરદાનોન્મુખં શાન્તં સર્વાશાસ્યવરપ્રદમ્ ॥ ૨૨॥

એતાદૃશં મહાદેવં ધ્યાયન્તી મનસા શિવમ્ । ૨૩.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રેવાવિરચિતં શિવધ્યાનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૪। ૧૦.૨-૨૩.૧ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 14. 10.2-23.1 ..

Proofread by Ruma Dewan

---

*Revavirachitam Shiva Dhyanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*